## ॥ शारीरकभाष्यविमर्शः ॥

### ( मंगलाचरणम् )

'कृष्ण'नाम्नावतीर्णं यदखण्डं हि परं बृहत् ॥
ब्रह्मरूपे प्रपञ्चे स्ववेणुनाहुतमोहकः ॥१॥
वंशो वै रुद्ररूपो[१]ऽसौ श्रीकृष्णस्याधरे धृतः ॥
तद्वेणोरवतारात्मा शंकरोऽप्यत्र मोहकः ॥२॥
"त्वञ्च रुद्र! महाबाहो! मोहशास्त्राणि कारय॥
माञ्च गोपय येने"ति पुराणाद्युक्तमानतः ॥३॥
कृष्णास्यात्मकवल्लभस्तु मायामोहवारकः ॥
साकारब्रह्मवादस्य वक्ता प्रादुरभूत् पुनः ॥४॥
नत्वा ताँश्चतुरो हृद्यान् विमर्शः क्रियतेऽधुना॥
शारीरकस्य भाष्यस्य मतिमोहनिवृत्तये॥५॥
प्रणम्य तातपादाँश्च धर्मदेवं च जेटलीम्॥
याभ्यामध्यापितो वक्तुं शक्तोऽभूवं न वै स्वतः॥६॥

### ( विषयोपक्रमः )

"न स्तौमि तं व्यासमशेषमर्थं सूत्राक्षरैर्यो न बबन्ध सम्यक्॥
विनापि तैः संग्रथिताखिलार्थं तं शंकरं नौमि सुरेश्वरञ्च" ॥७॥
इत्थन्तु सिद्धान्तविदा यदुक्तं सिद्धान्तबिन्दौ मधुसूदनेन॥
तस्यैव व्याख्योपम एष लेखो विद्यासु वेदान्तविदो मदीयः॥८॥



### ( क : अध्यासभाष्यविमर्शः )

१. मुक्तिप्रापकब्रह्माद्वैज्ञानावाप्तये क्रियमाणा जिज्ञासा किं द्वैताध्यासाधिष्ठानभूतस्य अज्ञानेन आवृतस्य ब्रह्मणः, विक्षेपावभासकस्य तस्य, तदन्यतरहितस्य, उभयसहितस्य आहोस्विद् आवरणविक्षेपरहितस्य शुद्धस्यैव ब्रह्मणः ?

मुक्त्यप्रापकत्वेन चत्वारोऽपि कल्पाः साक्षात्तु असम्भवाएव, उपासनार्थं कल्पितस्य परं जिज्ञास्यत्वोपपादनेतु मायाविद्ययोरपि आरादुपकारत्वम् अनिराकार्यमिति ताभ्यामपि गतार्थतासम्भवाद् उपासनार्थं कल्पितस्य ब्रह्मणो जिज्ञासायाः अन्यथासिद्धेश्च. तत्र प्रथमे कल्पे तावद् आवृतस्य विक्षेपानिवारकत्वमेव दोषः. द्वितीयेतु विक्षेपाधिष्ठानभूतस्य तदवभासकत्वेनैव स्वाज्ञाननिरास-कत्वानुपपत्तिः, शंखश्वेतिम्नो ज्ञानवतोऽपि पीतिमभ्रान्तेः अनुभूयमानत्वेन तथा. ज्ञानञ्च अज्ञानस्यैव निवर्तकं न वस्तुनः इति अभ्युपगमादपि जिज्ञासाजन्यज्ञानस्य विक्षेपानिवारकत्वम्. तृतीये उभयविधदोषान्यतरयोः तादवस्थ्यम्. तुर्ये उभयविधदोषा-पादकत्वं च अधिकम्. नच ब्रह्माद्वैतस्य निखिलद्वैतप्रतिषेधरूप-त्वेन अप्रसक्तस्य च प्रतिषेधानर्हत्वेनापि प्रतिषेधार्थमेव जिज्ञास्यत्वं सूपपादम् इति वाच्यं, तस्य प्रतिषेधानुषंगिकाहार्यज्ञा-नरूपतया भ्रान्तित्वानुपपत्त्या भ्रान्तप्रतिषेधाभावे अकिञ्चित्कर-तया च वैयर्थ्यात्. एवंहि पञ्चमो अवशिष्यते तत्र, "अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः" इति सूत्रयोः जिज्ञास्यब्रह्मलक्ष-णस्य अनुपलम्भाद्, जिज्ञास्यब्रह्मणश्च जिज्ञासु-जिज्ञासा-तदुपकरण-तत्फलरूपज्ञानादि- भेदघटित्वेन ज्ञेयब्रह्मरूपासमर्प-कत्वमेव. अवाङ्मनोगोचरस्य ज्ञेयब्रह्मणस्तु जिज्ञासाविषयत्वानु-पपत्तेरपि तथा, "नच एकं ततो अन्यद् द्वितीयं कुतः

स्याद्! नवा केवलत्वं नच अकेवलत्वं, न शून्यं नच अशून्यम् अद्वैतकत्वात् कथं सर्ववेदान्तसिद्धिं ब्रवीमि?" इत्येवम्भावेन जिज्ञासोपशामकविषयत्वानुपपत्तेः च.

२. यत्तु "कथं पुनः प्रत्यगात्मनि अविषये अध्यासो विषयतद्धर्माणां, सर्वोहि पुरो अवस्थिते विषये विषयान्तरम् अध्यस्यति युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनो अविषयत्वं ब्रवीषि? उच्यते : न तावद् अयम् एकान्तेन अविषयो [१] अस्मत्प्रत्ययविषयत्वाद् अपरोक्षत्वात् च प्रत्यगात्मप्रसिद्धेः"( -पृ.२),"सर्वोहि आत्मास्तित्वं प्रत्येति, न 'नाहमस्मि' इति... आत्मा च ब्रह्म. यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धम् अस्ति, ततो ज्ञातमेवेति अजिज्ञास्यत्वं पुनः आपन्नं, न [२] तद्विशेषं प्रति विप्रतिपत्तेः... एवं बहवो विप्रतिपन्नाः... तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते"(पृ.६). तदेतन्निरूपणं "यद्यपि क्वचिद् विषये तर्कस्य प्रतिष्ठितत्वम् उपलभ्यते तथापि प्रकृते तावद् विषये प्रसज्यतएव अप्रतिष्ठितत्वदोषाद् अनिर्मोक्षः तर्कस्य. [३] नहि इदम् अतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनम् आगममन्तरेण उत्प्रेक्षितुमपि शक्यं; रूपाद्यभावाद्धि नायम् अर्थः प्रत्यक्षगोचरो लिङ्गाद्यभावात् च नानुमानादीनाम् इति च अवोचाम(आगममात्रसमधिगम्यएव तु अयम् अर्थो धर्मवत्.पृ.१८८) अपिच सम्यज्ज्ञानाद् मोक्षः इति सर्वेषां वादिनाम् अभ्युपगमः. तच्च सम्यज्ज्ञानम् [४] एकरूपं वस्तुतन्त्रत्वाद्, [५] एकरूपेणहि अवस्थितो यो अर्थः स परमार्थः, लोकेहि तद्विषयज्ञानं 'सम्यज्ज्ञानम्' इति उच्यते यथा 'अग्निः उष्णः' इति तत्र एवं सति सम्यज्ज्ञाने पुरुषाणां विप्रतिपत्तिः



अनुपपन्ना. तर्कज्ञानानान्तु अन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिः... वेदस्यतु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः तज्जनितज्ञानस्य सम्यक्त्वम् अतीतानागतवर्तमानैः सर्वैरपि तार्किकैः अपह्नोतुम् अशक्यम्. अतः सिद्धम् अस्यैव औपनिषदस्य ज्ञानस्य सम्यज्ज्ञानत्वम् [६] अतो अन्यत्र सम्यज्ज्ञानत्वानुपपत्तेः" (पृ.१९३-१९४). इत्यत्र भगवत्पादैः यत् प्रतिपादितं तयोरेतयोः वाक्ययोः नूनं इतरेतरविप्रतिपत्तिग्रस्तताम् आविष्करोति.

तथाहि [१] प्रथमं तावद् प्रत्यगात्मत्वेन सामान्यतो अपरोक्षज्ञानविषयत्वं जिज्ञासाविषयस्य यद् उपपादितं तेन पुनः अजिज्ञास्यत्वापत्तिनिराकरणाय विशेषांशे जिज्ञासासम्भावना प्रदर्शिता. साच जिज्ञासा प्रत्यगात्मापरोक्षज्ञानेन न उपशाम्यति. तस्य असम्यक्त्वाद् विप्रतिपन्नत्वात् चेति आशंकायां [२] या विप्रतिपत्तयः प्रदर्शिताः. तासु सतीषु 'अहमस्मि' इति प्रत्यगात्मबोधस्य सम्यज्ज्ञानरूपता भवेद् नवा? अस्ति चेत् तत्र विप्रतिपत्त्यसम्भवः. विप्रतिपन्नत्वेतु 'अहं'बोधस्य स्वयमेव "अनात्माश्रयाहंममाध्यासहानात् तदेकोऽवशिष्टः शिवः केवलोऽहम्"(दशश्लो.२) इत्यत्र अनात्माश्रयत्वाभ्युपगमेन अहंबोधे अनवगतएव प्रत्यगात्मेति न सामान्यज्ञानविषयसम्भावनापीति न तत्र विशेषाकांक्षापि सम्भवदुक्तिका. अतोहि ब्रह्मप्रत्यगात्मैक्यस्यापि जिज्ञास्यत्वानुपपत्तिः. [३,४,५] किञ्च प्रत्यक्षादिप्रमाणागोचरस्य आगममन्तरेण उत्प्रेक्षितुमपि अशक्यस्य पारमार्थिकस्य ब्रह्माद्वैतस्य; अथच सम्यज्ज्ञानस्य यद् एकरूपत्वं च उपपादितं तत्र "अभ्युपगम्य च इमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याद् लोकवद् इति परिहारो अभिहितो, नतु अयं

विभागः परमार्थतो अस्ति, यस्मात् तयोः कार्यकारणयोः अनन्यत्वम् अवगम्यते. कार्यम् आकाशादिकं बहुप्रपञ्चं जगत् कारणं परं ब्रह्म. तस्मात्=कारणात् परमार्थतो अनन्यत्वं= व्यतिरेकेण अभावः कार्यस्य अवगम्यते... ब्रह्मव्यतिरेकेण कार्यजातस्य अभावः इति अवगम्यते... सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः स्वप्नव्यवहारस्येव प्राक्प्रबोधात्'' (पृ.१९६-१९८) इत्यत्र पारमार्थिक-व्यावहारिकभेदेन ब्रह्मण्यपि न एकरूपता अंगीकृतेति न पारमार्थिकत्वं नापि सम्यज्ज्ञानविषयत्वम् उभयविधस्यापि ब्रह्मणः सम्भवति. श्रुत्यैव बोधितस्य ब्रह्मणो जगत्कारणत्वस्य श्रुत्यैव बाधादपि तार्किकमतीयप्रतिज्ञावद् अन्योन्यविरुद्धतादोषा-नतिलंघनात् च. तथाहि ''तत्र एवं सति सम्यज्ज्ञाने पुरुषाणां विप्रतिपत्तिः अनुपपन्ना, तर्कज्ञानानान्तु अन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिः... अतः सिद्धम् अस्यैव औपनिषदस्य ज्ञानस्य सम्यज्ज्ञानत्वम् अतो अन्यत्र सम्यज्ज्ञानत्वानुपपत्तेः'' (पृ.१९४) इति तर्कज्ञानेषु आपादितानां मिथो विप्रतिपत्तिरूपाणां दोषाणाम् औपनिषदज्ञानेऽपि प्रसञ्जनाद् अजिज्ञास्यत्वं कुतो न भवेत्?

(ख : समन्वयाध्यायभाष्यविमर्शः)

१. तस्माद् निर्धर्मकनिर्विशेषे अवाङ्मनोगोचरे ब्रह्मणि श्रुतिवाच्यत्वस्यैव अनुपपत्त्या श्रुतीनां समन्वयोऽपि दूरापास्तइव आभाति. यत् पुनः बाधितार्थसामानाधिकरण्येन जड़ब्रह्मणोः हि अनन्यत्ववर्णनं तथा भागत्यागलक्षणया च पुनः जीवब्रह्मानन्यत्वं प्रतिपादितम्. तत्र ''अपिच क्वचिद् गौणः शब्दो दृष्टो नच एतावता शब्दप्रमाणके अर्थे गौणी कल्पना न्याय्या सर्वत्र अनाश्वासप्रसंगात्'' (पृ.३१) इति



प्रधानकारणतावादनिरासकहेतोः वैपरीत्यमेव आपतेत. अतोऽपि समन्वयासम्भवएव. तत्रापि पुनः शुद्धे पारमार्थिके सर्वविधद्वैतवि-वर्जिते ब्रह्मणि सर्ववेदान्तवाक्यानां समन्वयो अभ्युपेतव्यो अथवा मायिके अविद्याकल्पिते नामरूपात्मकजगत्कर्तरि ईश्वरे वा? इति विप्रतिपत्त्युपलम्भाद् जिज्ञास्ये ब्रह्मणि उत जिज्ञासोत्तरकालिके ब्रह्मात्मैक्यज्ञाने विषयतया उपलक्षिते ब्रह्मणि? इत्येतस्मिन् विषयेऽपि शारीरकभाष्यएव विप्रतिपत्तेः उपलम्भात् प्रथमाध्यायप्रतिपिपादयिषितः समन्वयः समन्वयएव न इति आस्थेयम्.

२. तथाहि अध्यासभाष्योपसंहारे ''एवम् अयम् अनादिः अनन्तो नैसर्गिको अध्यासो मिथ्याप्रत्ययरूपः... अस्य अनर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ताः आरभ्यन्ते. सच अयम् अर्थः सवेषां वेदान्तानां तथा वयम् अस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः'' (पृ.४) इति उक्त्वा द्वितीयाध्यायोपक्रमे प्रथमद्वितीययोः संगतिप्रदर्शनाय पुनः ''प्रथमे अध्याये सर्वज्ञः सर्वेश्वरो जगतः उत्पत्तिकारणं मृत्सुवर्णादयइव घटरुचकादीनाम्. उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं, मायावीव मायायाः. प्रसारितस्य जगतः पुनः स्वात्मन्येव उपसंहारकारणं अवनिरिव चतुर्विधस्य भूतग्रामस्य. सएव च सर्वेषां नः आत्मा इत्येतद्वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितम्. प्रधानादिकारणवादाश्च 'अशब्द'त्वेन निराकृताः'' (पृ.१७९) इत्येवं हि सर्वानर्थरूपजीवेशयोः योहि द्वैतं तस्य अत्यन्ताभावेन उपलक्षिते विवर्तोपादानभूते शुद्धे ब्रह्मणि सर्वानर्थप्रहापकात्मैकत्वविद्याजनकानां वेदान्तवाक्यानां समन्वयो अंगीक्रियेत आहोस्विद् अवनिरिव चतुर्विधभूतग्रामस्य

जगद्रूपविकारोपादानभूतस्य उत्पत्तिस्थितिप्रलयकर्तुः, अविद्या-कल्पितेन सर्वानर्थभूतजीवभावेन सह ऐक्यम्? इत्येतस्मिन् विषयेऽपि एकरूपत्वाभावेन वेदान्तवाक्यानां मिथो विप्रतिपन्नानां समन्वयो न साधीयान्.

३. किञ्च जगदुत्पत्तिस्थितिप्रलयहेतुत्वेन लिलक्षयिषिते जिज्ञास्ये ब्रह्मणि वेदान्तानां समन्वयप्रदर्शनाय प्रधानादिकारणेषु विसंगतिः या द्योतिता तत्र उपन्यस्तानां हेतूनां ब्रह्मणि विकारोपादानत्वसा-धकानां विवर्तोपादानभूते शुद्धे ब्रह्मणि तु ऐदम्पर्येण समन्वितं तात्पर्यम् उद्भावयितुमपि अशक्यमेव, मिथो अन्योन्ययोः बाध्यबाधकभावापन्नत्वादेव.

४. अपिच तैत्तिरीयोपनिषदि ब्रह्मवल्ल्यां तावत् ''सत्यं ज्ञानम् अनन्तं ब्रह्म'' (तैत्ति.उप.२।१) इति स्वरूपलक्षणमनु भृगुवल्ल्यां ''यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्ति अभिसंविशन्ति... तद् ब्रह्म इति'' (तैत्ति.उप.३।१) इति तटस्थलक्षणापरपर्यायरूपं कारणलक्षणं चापि वर्णितम्. तत्र ब्रह्मस्वरूपलक्षणघटकं प्रथमं 'सत्यम्' इति पदोपव्याख्यानरूपं सूत्रं ''जन्माद्यस्य यतः'' इति तदेतद्वाक्यांशभाष्यावलोकनेन निश्चीयते ''तदेव इदम् आकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिव अन्तर्गुहायां बुद्धौ दृष्टृ श्रोतृ मन्तृ विज्ञातृ इति एवं विशेषवद् उपलभ्यते. सएव तस्य प्रवेशः. तस्माद् अस्ति तत्कारणं ब्रह्म. अतो अस्तित्वाद् 'अस्ति'इत्येव उपलब्धव्यं तत्... यस्मात् सत्-त्यदादिकं मूर्तामूर्तधर्मजातं यत्किञ्च इदं सर्वम् अविशिष्टं विकारजातम् एकमेव 'सच्'छब्दवाच्यं ब्रह्म अभवद्''



(तैत्ति.उप.शांक.२।६) इत्येद्वाक्यैकवाक्यतया अवगम्यते. तथा 'ज्ञानम्'इति पदोपव्याख्यानरूपं ''शास्त्रयोनित्वाद्''इति सूत्रम् आलक्ष्यते. तथाहि ''जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्म इति उपक्षिप्तं तदेव द्रढयन् आह 'शास्त्रयोनित्वाद्' (इति) महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः=कारणं ब्रह्म. नहि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञाद् ईश्वराद् अन्यतः सम्भवो अस्ति'' (पृ.९) इति. ब्रह्मसार्वज्ञ्यञ्च ज्ञातृज्ञेयभाववर्जितं केवलं ज्ञानरूपमेव इत्यपि प्रतिपादितं तैत्तिरीयोपनिषद्भाष्ये ''कारणस्य च कारकत्वं वस्तुत्वाद् मृद्वद् अचिद्रूपता च प्राप्ता अतः इदम् उच्यते 'ज्ञानं ब्रह्म' इति. ज्ञानं ज्ञप्तिः अवबोधो भावसाधनो 'ज्ञान'शब्दो ब्रह्मविशेषणत्वात् 'सत्या'-'ऽऽनन्ता'भ्यां सह. नहि सत्यता अनन्तता च ज्ञानकर्तृत्वे सति उपपद्यते. ज्ञानकर्तृत्वेन विक्रियमाणं कथं सत्यं भवेद् अनन्तं च? यद्धि कुतश्चिद् न विभज्यते तद् अनन्तं, ज्ञानकर्तृत्वे च ज्ञेयज्ञानाभ्यां प्रविभक्तमिति अनन्तता न स्यात्'' (तैत्ति.उप.२।१) इति उक्तत्वात्. अतः सिद्धं 'शास्त्रयोनित्वाद्' इति सूत्रं सत्यज्ञानानन्तलक्षणकस्य ब्रह्मणो 'ज्ञान'पदोपव्याख्यानभूतम्. ''तत्तु समन्वयाद्'' इति सूत्रञ्चापि ब्रह्मलक्षणघटका-'ऽनन्त'पदव्याख्यानकल्पम् ''यथासंख्यामनु-देशः समानाम्''इति न्यायेन अंगीकर्तव्यम्.

तथाहि भगवद्गीताभाष्ये तावत् समन्वयहेतोः उपव्या-ख्यानभूतं वचनं हि ''वेदैश्च सर्वैः, अहमेव परमात्मा, वेद्यो=वेदितव्यः''(वेदवेद्यं परं ब्रह्म भगवतो अन्यद् इति शंकां वारयति 'वेदै'रिति आन.गि.भग.गी.१५।१५) इति

तदेव उपोद्बललितञ्च ''तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेव अवगम्यते. कथं? समन्वयात्. सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येण एतस्य अर्थस्य प्रतिपादकत्वेन समनुगतानि : 'सदेव, सौम्य!, इदम् अग्रे आसीद् एकमेव अद्वितीयम्'... इत्यादीनि. नच तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमाने अर्थान्तरकल्पना युक्ता'' (पृ.११) इति एतयो: वाक्ययो: सुस्पष्टं न कार्यकारणभावातीते किमुत निखिलरूपनामप्रपञ्चरूप-कार्यकारणभावात्मके सगुणे वेदान्तवेद्ये ब्रह्मणि समन्वयो कण्ठरवेण घोषित:. वेदान्ततात्पर्यविषयीभूतन्तु ब्रह्म पुन: अन्यादृशमेवेति. तदेतद् उक्तमेव उपरिष्टाद् ''अद्वैतकत्वात् कथं सर्ववेदान्तसिद्धिं ब्रवीमि'' इति दशश्लोक्याम्. एतस्य ज्ञेयस्य ब्रह्मणस्तु सर्वथा अवाङ्मनोगोचरतया अवाच्यत्वेन अवेद्यत्वेन वेदान्तपदवाच्याद् वेद्यात् च सगुणब्रह्मणस्तु भिन्नत्वोपगमादेव. या पुन: छान्दोग्योपनिषच्छ्रुति: उदाहृता ''सदेव , सौम्य!, इदम् अग्रे आसीद् एकमेव अद्वितीयम्'' इति तत्र एतस्मिन् वाक्ये 'इदमा' वक्ष्यमाणं नामरूपात्मना प्रविभक्तं दृश्यमानम् इदं जगत् स्वाविर्भावात् पूर्वमपि सदेव आसीद् एकमेव अद्वितीयम् इति प्रतिपाद्य एतद्वचनोत्तरांशे ''कथम् असत: सद् जायेत'' इत्यत्र यत् सत्त्वम् अभ्युपगतं न तत् पारमार्थिकं भवितुम् अर्हति ब्रह्मज्ञानबाध्यत्वादेव पूर्वन्तु एतस्य व्यावहारिकस्य यद् निखिलद्वैतवर्जितं सत्त्वं तेनतु पारमार्थिकेनैव भवितव्यमिति सैद्धान्तिकी स्थिति:. तथाच अद्वैतसम्प्रदायाभियुक्तोक्ति: ''अस्ति भाति प्रियं रूपं नाम च इति अंशपञ्चकम्, आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्'' (सिद्धा.ले.सं.२।७) इति अब्रह्मात्मकयो: नामरूपयो:



ब्रह्मज्ञानोत्तरं पारमार्थिकसत्त्वाभ्युपगमस्य अकल्पनीयत्वात्. तदेतत् प्रतिपादितं भाष्यकारेणैव ''ननु मृदादिदृष्टान्तप्रणयनात् परिणामवद् ब्रह्म शास्त्रस्य अभिमतम् इति गम्यते, परिणामिनोहि मृदादयो अर्था: लोके समधिगता: इति; 'न' इति उच्यते,... सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मण: कूटस्थत्वावगमात्... सूत्रकारोऽपि परमार्थाभिप्रायेण 'तदनन्यत्वम्' इति आह व्यवहाराभिप्रायेण तु 'स्याद् लोकवद्' इति महासमुद्रस्थानीयतां ब्रह्मण: कथयति, अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां च आश्रयति, सगुणेषु उपासनेषु उपयोक्ष्यते इति'' (पृ.२००-२०२).

५. तस्माद् ज्ञेये अवाच्ये अशब्दे ब्रह्मणि वेदान्तानां जडरूपजगत्कारणतयातु समन्वयो अशक्यवचनएव. जगत्कारण-भूतस्य सगुणस्यैव तस्य शब्दवाच्यत्वेन ''[१] अथातो ब्रह्मजिज्ञासा [२] जन्माद्यस्य यत:, [३] शास्त्रयोनित्वात्, [४] तत्तु समन्वयात्, [५] ईक्षते: न अशब्दं, [६] गौण: चेद् न 'आत्म'शब्दाद्'' इति षट्सूत्र्या: तात्पर्यमीमांसायां लक्षणलक्ष्य-मोक्षप्रदब्रह्मणस्तु भृशं वैरूप्यादेव अद्वैतवेदान्ते समन्वयो अशक्यवचन:. यतश्च सम्यज्ज्ञाने पुरुषाणां विप्रतिपत्ति: अनुपपन्ना:. तर्कज्ञानानामिव अद्वैतवेदान्तज्ञानेऽपि पारमार्थिक-व्यावहारिकभेदोपगमेन अन्योन्यविरोधात् प्रसिद्धत्येव विप्रतिपत्ति:, पारमार्थिकं ज्ञानम् अबाधितं व्यावहारिकन्तु ब्रह्मज्ञानबाध्यमेवेति. तथापि मिथो अविप्रतिपत्तिरेव चेद् एतयो: पारमार्थिक-व्यावहारिकयो: तदा आर्हतै: किम् अपराद्धं न ते निराकरणीया:! निराकृताश्च ते पुन: ''स्याद् अस्ति स्यान्नास्ति... एवम् एकत्वनित्यत्वादिष्वपि इमं सप्तभंगीनयं योजयन्ति. अत्र आचक्ष्महे न अयम् अभ्युपगमो युक्त:

इति. कुत:? एकस्मिन् असम्भवात् नहि एकस्मिन् धर्मिणि युगपत् सदसत्त्वादिविरुद्धधर्मसमावेश: सम्भवति'' (पृ.२५३) इति अविरोधाध्याये. निराकृताश्चापि सौगता: ''न खलु अभावो बाह्यार्थस्य अध्यवसातुं शक्यते. कस्माद्? उपलब्धे:. उपलभ्यते हि प्रतिप्रत्ययं बाह्यो अर्थ: स्तम्भ: कुड्यं घट: पट: इति. नच उपलभ्यमानस्यैव अभावो भवितुम् अर्हति... ननु नाहमेवं ब्रवीमि न कञ्चिद् अर्थम् उपलभे इति; किन्तु, उपलब्धिव्यतिरिक्तं न उपलभे इति ब्रवीमि. बाढम् एवं ब्रवीषि निरंकुशत्वात् तुण्डस्य. नतु युक्त्युपेतं ब्रवीषि. यतो उपलब्धिव्यतिरेकोऽपि बलाद् अर्थस्य अभ्युपगन्तव्य: उपलब्धेरेव'' (पृ.२४८) इत्यत्र. अपिच सर्वविधद्वैतबाधाधिष्ठानभूतस्य ब्रह्मणो विकल्पासहिष्णुस्वरूपावबोधे य: प्रपञ्चप्रतिषेधो अंगीक्रियते ''नच त्वं नचाहं नचायं प्रपञ्च:'' (दशश्लोकी ७) स यदि सैद्धान्तिक: चेद् नैव निराकरणीया: सौगता:. यस्मात् तन्निराकरणाय प्रयुक्ता: युक्तय: स्वारूढशाखोच्छेदनायेरन्. तथाहि ''यद् उक्तं बाह्यार्थपलापिना स्वप्नादिप्रत्ययवद् जागरितगोचराअपि स्तम्भादिप्रत्यया: विनैव बाह्यार्थेन भवेयु: प्रत्ययत्वाविशेषाद् इति. तत् प्रतिवक्तव्यम्. अत्र उच्यते न स्वप्नादिप्रत्ययवद् जाग्रत्प्रत्यया: भवितुम् अर्हन्ति. कस्माद्? वैधर्म्याद् वैधर्म्यं हि भवति स्वप्नजागरितयो: किं पुन: वैधर्म्य? बाधाबाधविति ब्रूम:... तत्रैवं सति न शक्यते वक्तुं मिथ्या जागरितोपलब्धि: उपलब्धित्वात् स्वप्नोपलब्धिवद् इति उभयो: अन्तरं स्वयम् अनुभवता. नच स्वानुभावापलाप: प्राज्ञमानिभि: युक्त: कर्तुम्. अपिच अनुभवविरोधप्रसंगाद् जागरितप्रत्ययानां स्वतो निराम्बनतां वक्तुम् अशक्नुवता स्वप्नप्रत्ययसाधर्म्याद् वक्तुम् इष्यते. नच यो यस्य स्वतो



धर्मो न सम्भवति सो अन्यस्य साधर्म्यात् तस्य सम्भविष्यति. नहि अग्नि: उष्णो अनुभूयमान: उदकसाधर्म्यात् शीतो भविष्यति'' (पृ.२५०-२५१). इत्येवं यदि सौगतमतं निराकरणीयं स्याद् न वक्तव्यम् आसीद् ''स्वप्नव्यवहारस्येव प्राक्प्रबोधात्'' (पृ.१९६-१९८) इति. अथ एवं निरासे चिकीर्षिते तु स्वारूढशाखैव उच्छन्ना न भवेत् किमु? नच स्वप्नसाधर्म्यरूपतर्काश्रयावलम्बनादेव जाग्रत्प्रत्ययविषयीभूतस्य प्रपञ्चस्य निरालम्बनता इह निराचिकीर्षिता वेदान्तेतु न स्वप्नसाधर्म्यतर्काश्रयणात् किमुत निर्विकल्पब्रह्माद्वैतज्ञानबाध्यत्वेनैव स्वाप्निकप्रत्ययवत् प्रपञ्चस्य मिथ्यात्वम् आस्थीयतइति प्रभेद: इति वाच्यं, ब्रह्मज्ञानिनां वामदेवादीनामिव इतरेषापि ''ब्रह्म वा इदम् अग्रे आसीत्. तद् आत्मानमेव अवेद 'अहं ब्रह्मास्मि' इति तस्मात् तत् सर्वम् अभवत्. तद् यो देवानां प्रत्यनुबुध्यत सएव तद् अभवत्. तथा ऋषीणां तथा मनुष्याणाम्. तद्धैतत् पश्यन् ऋषि: वामदेव: प्रतिपेदे 'अहं मनु: अभवम् सूर्यश्च' इति. तदिदमपि एतर्हि य: एवं वेद 'अहं ब्रह्मास्मि' इति स इदं सर्वं भवति'' (बृह.उप.१।४।१०) इत्यत्र ब्रह्मज्ञानेन सर्वरूपता सर्वनामता सम्पद्यमाना द्योत्यते न पुन: सर्वेषां नामरूपाणां स्वस्मिन् उपलक्षिता बाधाधिष्ठानता. तस्माद् नामरूपाभ्यां प्रविभक्तस्य जगतो ब्रह्मणि एकीभावएव विवक्षितो न जातु प्रतिषेधो बाधो वा इति सुस्थिरम् आस्थेयम्. तस्मात् अस्ति-भाति-प्रियत्वरूपांशत्रयवदेव शिष्टनामरूपांशद्वयस्यापि ब्रह्मरूपता अंगीकरणीयैव.

तथाहि ''सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वा अभिवदन् यद् आस्ते'' (तैत्ति.आर.३।१२।७),

"प्रजापतिः प्रजाः असृजत. ताः सृष्टाः समाश्लिष्यन् ताः रूपेण अनुप्राविशत् तस्माद् आहुः रूपं वै प्रजापतिः इति. ताः नाम्ना अनुप्राविशत् तस्माद् आहुः नाम वै प्रजापतिः इति" (तैत्ति.ब्राह्म.२।२।७) "अग्निः यथा एको भुवनं प्रविष्टो रूपं-रूपं प्रतिरूपो बभूव एकः तथा सर्वभूतान्तरात्मा रूपं-रूपं प्रतिरूपो बहिश्च" (कठोप.२।२।९), "तद्धेदं तर्हि अव्याकृतम् आसीत् तद् नामरूपाभ्यामेव व्याक्रियत 'असौ नामा अयम्'-'इदं रूप'इति. सएषः इह प्रविष्टः... प्राणन्नेव प्राणो नाम भवति वदन् वाग् भवति... एतानि कर्मनामान्येव. स यो अतः एकैकम् उपासते न स वेद, अकृत्स्नो हि एषो अतः एकैकेन भवति. 'आत्मा' इत्येव उपासीत अत्रहि एते सर्वे एकं भवन्ति" (बृह.उप.१।४।७) इत्येवमादिषु वाक्येषु रूपनामकर्मणां प्रजापतिसृष्टत्वं प्रजापतेश्च तद्रूपत्वेन एकीभावोऽपि द्योतितः उत्पत्तिविधौ. तथा पालनविधौ "त्रयं वा इदं नाम रूपं कर्म... ब्रह्मैतद्धि सर्वाणि नामानि...रूपाणि... कर्माणि बिभर्ति. तदेतत् त्रयं सद् एकम् अयम् आत्मा आत्मा उ एकः सन् एतत्त्रयम्" (बृह.उप.१।६।१-३) इति. उपसंहारविधावपि "स यथा सैन्धवखिल्यः उदके प्रास्तः उदकमेव अनुविलीयेत न ह अस्य उद्ग्रहणायैव स्याद्. यतो-यतस्तु आददीत लवणमेव. एवं वा अरे इदं, महद् भूतम् अनन्तम् अपारं विज्ञानघनएव, एतेभ्यो भूतेभ्यः समुत्थाय तान्येव, अनुविनश्यति" (बृह.उप.२।४।१२) "यथा इमाः नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्य अस्तंगच्छन्ति भिद्येते च आसां नामरूपे 'समुद्र' इत्येवं प्रोच्यते" (प्रश्नोप.६।५) इत्येवमादिवचनेषु एकीभावात्मा लयः उपदिष्टो न खलु रज्जौ सर्पइव बाधरूपो लयः. अतोहि एकीभावात्मकम्



अद्वैतम् अभ्युपगन्तव्यं नतु निखिलद्वैतबाधाधिष्ठानरूपम् अद्वैतम् इति निश्चप्रचम्.

६. तस्मिन् एतस्मिन् एकीभावरूपतादात्म्यरूपे अद्वैतएव, न पुनः आविद्यकनिखिलद्वैतभावविक्षेपबाधेन तदत्यन्ताभावोपलक्षिते अद्वैते, सर्वासां श्रुतीनां समन्वयो प्रतिपिपादयिषितो अभ्युपगमनीयः. तद् एतद् आम्नातं "सन्मूलम् अन्विच्छ सन्मूलाः सर्वाः इमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः(नतु सदसदनिर्वचनीयमायामूलाः मायायतनाः मायाप्रतिष्ठाः). यथा नु खलु, सौम्य!, इमाः तिस्रो देवताः पुरुषं प्राप्य त्रिवृद् एकैका भवति... अस्य पुरुषस्य प्रयतो वाङ् मनसि सम्पद्यते(नतु बाध्यते), मनः प्राणे, प्राणः तेजसि, तेजः परस्यां देवतायां (सम्पद्यते नतु बाध्यते), स य एषो अणिमा ऐतदात्म्यम् इदं सर्वं (नामरूपकर्मात्मना प्रविभक्तम् 'इदमा' निर्दिश्यमानं जगत्) तत्(तादात्म्यं) सत्यं स (परदेवता आत्मा तत् (ऐतदात्म्यं) त्वं (ब्रह्मजिज्ञासो श्वेतकेतो) असि" (छान्दो.उप.६।८।६).

यत्तु भगवत्पादैः "ननु न युक्तम् इदं असंसारिण्याः सर्वज्ञयाः देवतायाः बुद्धिपूर्वकम् 'अनेकशतसहस्रानर्थाश्रयं देहम् अनुप्रविश्य दुःखम् अनुभविष्यामि' इति संकल्पनं... सत्यमेवं न युक्तं स्याद्, यदि स्वेनैव अविकृतेन रूपेण अनुप्रविशेयं दुःखम् अनुभवेयम् इति च संकल्पवती... अनेन जीवेन आत्मना अनुप्रविश्य इति वचनं जीवो हि नाम देवतायाः आभासमात्रं... पुरुषप्रतिबिम्ब जलादिष्विव च सूर्यादीनाम्. ननु छायामात्रः चेद् जीवो मृषैव प्राप्तः तथा परलोकेहादि च तस्य. नैष दोषः सदात्मना सत्यत्वाभ्युपमात्. सर्वञ्च

नामरूपादि सदात्मनैव सत्यं विकारजातं स्वतस्तु अनृतमेव... सदात्मना सर्वव्यवहाराणां सर्वविकाराणां च सत्यत्वं सतो अन्यत्वे च अनृतत्वमिति न कश्चिद् दोषः तार्किकैः इह अनुवक्तुं शक्यः''( छान्दो.उप.भा.६।३।३ ) इति तत्र इदं प्रष्टव्यं भवति यदि जीवो ब्रह्मैव नापरः इति ब्रह्मात्मैक्यज्ञानं यदि सम्यज्ज्ञानं चेत् तदा तेनापि एकरूपेणैव भवितव्यं न जातु कदाचिद् एवं अन्यदातु अनेवमपि तदभ्युपेतं ''एकरूपेणहि अवस्थितो यो अर्थः स परमार्थः, लोकेहि तद्विषयज्ञानं 'सम्यज्ज्ञानम्' इति उच्यते यथा 'अग्निः उष्णः' इति तत्र एवं सति सम्यज्ज्ञाने पुरुषाणां विप्रतिपत्तिः अनुपपन्ना'' ( पृ.१९३-१९४ ) इति. नच एकरूपेण परमार्थतो अवस्थितो हि अर्थो विवक्षितः परमार्थः तस्यैव पुनः भ्रान्त्या तु अन्यथावस्थानमपि पारमार्थिक्या अवस्थया न न शक्यते इति वाच्यं, सत्यमेतत् एकेन पुरुषेण पारमार्थिकी अवस्था भ्रान्तेन अज्ञेन वा अपरेणतु अपारमार्थिकी अवस्थापि अवगता वर्णिता च पारमार्थिकीम् अवस्थां न निराकरोति, एकेनापि पुरुषेण बाल्याद्यवस्थाभेदेन उभयविधापि अवस्थावगतिवर्णने न अन्योन्यापहारिके भवेताम्. इहतु एकेनैव शास्त्रेण एकस्यैव जीवस्य स्वरूपप्रतिपादने कदाचित् पारमार्थिकेन ब्रह्मणा ऐक्यम् अन्यदातु भेदोऽपि इति महती विसंगतिः. ननु उक्तम् अप्रसक्तप्रतिषेधो अशक्यः इति अध्यारोपापवादन्यायेन शाखारुन्धतीन्यायेन वा प्राक्तु ब्रह्मावबोधाद् उपासनार्थं तथा मिथो विरुद्धवर्णनं न दोषाय इति चेत्, न प्रत्यक्षादिप्रमाणैः अनवगतार्थे विषये शास्त्रप्रामाण्यं तद् ब्रह्मणो जीवभावापत्तिः तावद् न श्रुत्यादिशास्त्रव्यतिरेकेन केनापि प्रमाणेन अवगता सैव पुनः श्रुत्यादिशास्त्रैरेव प्रतिषिध्यते चेद् अप्रामाण्यापादिनी



विप्रतिपत्तिस्तु अनिराकार्यैव भवेत्, ''प्रक्षालनाद्धि पंकस्य दूराद् अस्पर्शनं वरम्''न्यायेन. मिथः समन्वितेषु वाक्येषु प्रामाण्यप्रत्ययो नासमन्वितेषु. भूयाँस्तु भागो श्रुतीनां सगुणब्रह्मप्रतिपादनेन एकवाक्यतापन्नो यदि अन्ततः प्रतिषेधार्थं प्रसक्तः उपलभ्यते चेद् भवेदेव विप्रतिपत्तिः एकतरप्रमित्यजननात्. अप्रतीतं भ्रान्तिप्रतीतं वा प्रतिषिध्य किञ्चित् श्रुतिप्रमापितं भवितुम् अर्हति, न पुनः श्रुतिप्रतीतं तत् श्रुतिरेव प्रत्याख्यातुं शक्नोति. अथ चेदेवं कथञ्चित् तदातु यस्मिन् सगुणे ब्रह्मणि वेदान्तवाक्यानां समन्वयो न तस्मिन् पारमार्थिकं तात्पर्यं यस्मिन् पुनः तात्पर्यं न तेषां समन्वयइति असमञ्जसमेव सर्वं भवेत्. सृष्टजडपदार्थानां मिथ्यात्ववद् जीवानामपि मिथ्यात्वम् अथवा जीवानां ब्रह्मात्मैक्यवद् जडपदार्थानामपि ब्राह्मैक्यम् न निराकरणीयम्. यद् आह श्रुतिः ''स यथा ऊर्णनाभिः तन्तुना उच्चरेद् यथा अग्नेः क्षुद्राः विस्फुलिंगाः व्युच्चरन्ति एवमेव एतस्माद् आत्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्य उपनिषत् सत्यस्य सत्यम् इति प्राणाः वै सत्यं तेषाम् एषः सत्यम्'' ( बृह.उप.२।१।२० ), ''यस्तु सर्वाणि भूतानि आत्मन्येव अनुपश्यति सर्वभूतेषु च आत्मानं ततो न विजुगुप्सते. यस्मिन् सर्वाणि भूतानि आत्मैव अभूद् विजानतः तत्र को मोहः कः शोकः एकत्वम् अनुपश्यतः'''' ( ईशा.उप.६,७ ) इति.

७. तद् एतत् श्रुतिविवक्षितं सत्यानामेव निखिलप्राणलोकदेवभूतादीनां परमसत्यरूपस्य सर्वोपादानस्य सर्वकर्तुः सर्वान्तर्यामिणो ब्रह्मणो हि एकत्वं न अनेकत्वबाधाधिष्ठानरूपं किमुत अनुदर्शनरूपम् एकत्वानेकत्वयोः अन्योन्यात्मकतारूपं अनेकत्व-

सहिष्णवेकत्वरूपम् इति यावत् तदेव सर्वशोकमोहभयापहम् इति वेदान्तवाक्यानां समन्वयसिद्धः सिद्धान्तः प्रतिभाति.

तस्य एतस्य सर्वश्रुतिसमन्वयसिद्धस्य सर्वेशस्य सर्वोपादानस्य स्वरूपविषये यत् शारीरकभाष्यकर्तुः अभिप्रायो "यस्तु दृष्टान्तो राज्ञः सर्वार्थकारिणि कर्तरि उपचाराद् राजा कर्ता इति सो अत्र अनुपपन्नः 'स ईक्षाञ्चक्रे' इति श्रुतेः मुख्यार्थबाधनात् प्रमाणभूतायाः. तत्रहि गौणी कल्पना शब्दस्य यत्र मुख्यार्थो न सम्भवति" (प्रश्नोप.भा.६।३।३) इति. तथाच मुख्यार्थाबाधनेन वेदान्तविचारणया भवितव्यम् आसीत् परन्तु यथा चाह सिद्धान्तलेशसंग्रहकारः "प्राचीनैः व्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं सन्नह्यद्भिः अनादरात् सरणयो नानाविधा दर्शिताः" (सिद्धा.लेश.२) इति अनेकविधविप्रतिरूपाः श्रुतीनां गौणार्थकल्पनया प्रदर्शिताइति तासाम् एतासां सर्वासां निष्कृष्टार्थस्तु संक्षेपशारीरककारैरेव यथा उपपादितः सतु अविस्मर्तव्यएव "कृपणधीः परिणामुदीक्षते क्षपितकल्मषधीस्तु विवर्तताम् स्थिरमति पुरुषः पुनरीक्षते व्यपगतद्वितीयं परमं पदम्","ईशितव्यम् अनपेक्ष्य नेश्वरो नेशितव्यमपि तद्वद् ईश्वरम्, अन्तरेण घटते ततो ततो मृषा मोहमात्रपरिकल्पितं द्वयम्. न प्रमेयम् अपहाय मातृता नापि मातृविरहे प्रमेयता, मातृमेयरहिता नच प्रमा न प्रमाणरहितं प्रमाफलम्" (संक्षे.शारी.२।८९-३।१८८-१९१) इति अद्वैतवेदान्ते वस्तुतस्तु प्रमेयप्रमाणप्रमित्यपेक्षाभावादेव समन्वयसाधनमपि असमन्वितमेव आभाति इति अलम् अतिविस्तरेण.

समन्वयाध्यायविमर्श एषः श्रीशंकराचार्यकृते हि भाष्ये।



पूर्णोऽभवद् ब्रह्मविचिन्तनात्मा दिष्ट्याग्रिमेष्वपि भवेन्न कुतः कदाचित्॥

इति गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण
विरचितः
शारीरकभाष्यविमर्शे समन्वयाध्यायविमर्शः